# पाठ-२०
# अनन्तः ज्ञानसागरः

**सारान्शः**
संस्कृतसाहित्यस्य ज्ञानराशिः अनन्तः। आध्यात्मिकग्रन्थेषु वेद-पुराणादयः अनेके ग्रन्थाः एतादृशाः यान् अधीत्य वैदेशिकाः अपि चमत्कृताः जाताः । वैज्ञानिकसाहित्यम् अधिकृत्य अपि इदानीं शोधकार्याणि प्रचलन्ति । सुश्रुतः प्रथमः त्वक् प्रत्यारोपकः इति प्रसिद्धः । जीवकः शल्यचिकित्सकः आसीत् । तेन भोजराजस्य मस्तिष्कस्य शल्यचिकित्साम् अकरोत् ।विज्ञानस्य विविधक्षेत्रेषु प्राचीनैः महर्षिभिः चमत्कारपूर्णानि अनुसन्धानकार्याणि कृतानि। आर्यभटेन गणिते शून्यस्य सिद्धान्तः वर्णितः । संख्यापदानि 'हिन्दसे' इति कथ्यन्ते यतः तानि भारतदेशात् अरबदेशं प्रति गतानि । वास्तुविज्ञानेऽपि अद्वितीयभवननिर्माणानि आश्चर्यम् उत्पादयन्ति। रसायनविज्ञाने विविधधातूनां योगेन विविधाः औषधयः रच्यन्ते स्म ।वराहमिहिरस्य बृहत्संहितायां गजानाम् अश्वानां, कुक्कुटानाम् इत्यादीनाम् अनेकेषाम् आयुर्विषये महत्त्वपूर्णं ज्ञानं प्रदत्तम् । अस्मिन् ग्रन्थे एव वृक्षायुर्वेदः अपि समाहितः। एषः ग्रन्थः ज्योतिश्शास्त्रस्य बहुमूल्यं विवरणं प्रददाति आर्यभट्टस्य आर्यभटीयम् अपरः महत्त्वपूर्णः ग्रन्थः यत्र ग्रहाणां गतिविषये वर्णनम् अस्ति। 'भूगोल' इति शब्दः एव भूः गोलः वर्तते इति साधयति ।विमानशास्त्रे पारदस्य योगेन, सौर-उर्जायाः उपयोगेन च विमानानि उड्डयन्ते स्म । यन्त्रसर्वस्वे त्रिपुरविमानस्य वर्णनमपि उपलभ्यते यत् विमानं जले, भुवि, अन्तरिक्षे च सम्यक् चलितुं शक्नोति स्म । अतः अपूर्वः अनन्तः च अस्माकं विज्ञानराशिः।

**मुख्य बिन्दवः**
**सुश्रुत संहिता-** आयुर्वेदे शल्यचिकित्सा विषयकः, प्रसिद्धः ग्रन्थः । अस्य लेखकः महर्षि सुश्रुतः अस्ति ।
**चरक संहिता-** रोगनिदानं चिकित्साविधेः च प्रमुखः ग्रन्थः । अस्य प्रणेता महर्षिः चरकः अष्टाङ्गहृदयम्, भावप्रकाशः आदयः अपि आयुर्वेदस्य ग्रन्थाः ।
**सुश्रुतः -** भारतस्य प्रसिद्धः प्राचीनतमः शल्यचिकित्सकः।
**जीवकः**- एकः प्रसिद्धः शल्यचिकित्सकः । एषः एव भोजराजस्य मस्तिष्कस्य शल्यक्रियाम् अकरोत्।
**वेदाः-** वेदाः चत्वारः, ऋक्, यजुः, साम, अथर्व च। उपवेदाः अपि चत्वारः आयुर्वेदः, धनुर्वेदः गान्धर्ववेदः, स्थापत्यवेदः, अर्थवेदः ।
**वेदाङ्गानि -** षट् सन्ति- शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दः, ज्यौतिषम् च।
**पुराणानि -** अग्नि, वायु, शिव, भागवत्, स्कन्द, गरुड़, कूर्म, नारद, मार्कण्डेय, ब्रह्म, पद्म, विष्णु, भविष्यत्, बराह, ब्रह्मवैवर्त, लिङ्ग, वामन, मत्स्य- अष्टादश पुराणानि सन्ति ।

**अवगच्छामः**
भारतीय ग्रन्थेषु पशूनां वृक्षाणां विषये अपि स्वतन्त्रचिकित्साग्रन्थाः उपलभ्यन्ते ।
**यथा -** अश्वायुर्वेदः,गजायुर्वेदः,वृक्षायुर्वेदः, सौरमण्डलम्,
**कुजः कः?-** भूमिपुत्रः मंगलग्रहः । एतेनैव मंगलग्रहे जीवनस्य सम्भावना क्रियते आधुनिकवैज्ञानिकैः ।
**ग्रहाणां प्रकाशः-** ये ग्रहाः प्रकाश्यन्ते ते सर्वे सूर्यात् एव प्रकाशं प्राप्नुवन्ति ।
**आर्यभटीयम् किम्?** आर्यभट्टस्य ज्योतिष शास्त्र विषये महत्त्वपूर्णा रचना अस्ति।
**विमानशास्त्रम् -**भरद्वाजः विमानचालने सौर ऊर्जायाः प्रयोगः लिखितः । तेन लिखितः ग्रन्थः अस्ति- **'यन्त्रसर्वस्वम्'** ।
भोजराजकृतं **'समराङ्गणसूत्रधारम्** अपि विमानशास्त्रस्य परिचयं यच्छति।

**आवश्यकोऽयं ज्ञानम्**
अस्माकं संस्कृतवाङ्मयम् अत्यधिकं प्राचीनं विशालं सागरवत् ज्ञानगम्भीरं विराजते। न केवलम् आध्यात्मिकक्षेत्रे अपितु विज्ञानक्षेत्रे अपि प्राचीनभारतीयैः ऋषिभिः बहवः वैज्ञानिकसिद्धान्ताः सूत्ररूपेण सन्दर्शिताः । अद्यत्वे पाश्चात्यविद्वांसः अपि भारतीयविज्ञानेन आकृष्टाः भूत्वा अनुसन्धानकार्याणि कुर्वन्ति । अनेकाः पाण्डुलिपयः विदेशेषु, मठेषु, मन्दिरेषु इदानीमपि वर्तमानाः सन्ति यासां प्रकाशनं न जातम्। भारतीय ज्ञानराशेः संरक्षणम् अस्माकं सर्वेषामेव कर्तव्यमस्ति । **अत एव उक्तं**- "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिः तथा"।

**व्याकरण बिन्दवः शब्द भण्डाराश्च**
कर्मवाच्ये कर्ता तृतीयान्तः भवति कर्म प्रथमान्तं, क्रियायाः सम्बन्धः कर्ता सह न भवति अपितु कर्मणा सह भवति ।
यथा (i) (कर्म वा.) वैद्येन अभ्रकस्य संस्कारः कृतः ।
(कर्तृ वा.) वैद्यः अभ्रकस्य संस्कारं करोति ।
**शब्दार्थाः**
1. वाङ्मयम् = साहित्य
2. गुल्मकं = झाड़ी
3. रसायनविज्ञाने = कैमिस्ट्री में

4. पारदं = पारे को
5. कुज = मंगल ग्रह
6. मा प्रमदः = आलस्य मत करो
7. सञ्चार्यमाणानि = चलाये जाते हुये
8. गरिमाणम् = गरिमा को

**योग्यतां वर्धयत**

**आध्यात्मिकं साहित्यम् -** उपनिषदः- एकादश उपनिषदः अतीव प्रसिद्धाः- ईश, केन, कठ, प्रश्न, मुण्डक, माण्डूक्य, एतरेय, तैत्तिरीय, बृहदारण्यक, छान्दोग्य, श्वेताश्वतर इति ।

**दर्शनानि -** आस्तिकदर्शनानि, तानि यानि वेदं प्रमाणं मन्यन्ते- सांख्यम्, योगः, न्यायः, वैशेषिकम्, पूर्वमीमांसा, उत्तरमीमांसा । नास्तिकदर्शनानि वेदं प्रमाणं न मन्यन्ते- बौद्धदर्शनम्, जैनदर्शनम्, चार्वाकदर्शनम्।

**वैज्ञानिकं साहित्यम् -** शाखाः आयुर्वेदः, गणित, भौतिकशास्त्रम्, रसायनशास्त्रम्, जीवशास्त्रं, ज्योतिश्शास्त्रम् इत्यादयः । भूमिः पञ्चभूतात्मिका कपित्थफलाकारिका च इति प्राचीनकाले मन्यते स्म ।भूमिः एव भ्रमति इति सौरमण्डलमपि पराशक्तिं केन्द्रीकृत्य भ्रमति इति अस्मत्पूर्वजैः सिद्धान्तितम् । भूभृत् इति पर्वतस्य पर्यायः । भुवं धारयति इति पर्वताः भूतोलनं साधयन्ति इति मन्यते स्म । ऊर्जासंरक्षणनियमः, अणुसिद्धान्तः, द्रव्यनिर्माणम् इत्यादयः विषयाः वैदिककालादारभ्य भारते प्रसृताः दृश्यन्ते।

**पाठ संप्रेष्यः**

- संस्कृतवाङ्मयं द्विविधं भवति- आध्यात्मिकं ज्ञानविज्ञानात्मकम् च ।
- विज्ञानस्य क्षेत्रे आयुर्वेदः, गणितम्, ज्योतिषम्, वास्तुविज्ञानं, रसायनं, जीवविज्ञानं, विमानविज्ञानम् इति विविधाः शाखाः ।
- प्राचीनं वैज्ञानिकं साहित्यम् अतीव समृद्धं विशालं च वर्तते
- वयम् प्राचीनविज्ञानस्य उपेक्षां न कुर्याम, अपितुस्वाध्यायं कृत्वा शोधकार्यं कुर्याम ।
- त्व, तल्, घञ् प्रत्ययानां योगेन भाववाचकशब्दानां निर्माणं भवति ।
- पञ्चमीविभक्तिः अपादाने प्रयुज्यते, षष्ठी च सम्बन्धं प्रकटयति ।
- कर्मवाच्ये कर्तरि तृतीया भवति, कर्मणि प्रथमा, क्रिया च कर्मपदम् अनुसरति न कर्तृपदम् ।
- चुर्, गण्, भक्ष्, कथ् धातूनां रूपाणि समानानि भवन्ति ।

**अधिकाङ्कानाम् अर्जनं कथं भवेत् ।**

- ➢ पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- ➢ पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात् ।
- ➢ अधिकाधिक अध्याये संदर्भित विषयाणां अध्ययनं कर्तव्यम्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत ।
- मूल पाठस्य अभ्यासं कुरुत।